श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवादिराजयति विरचितम्

# ॥ श्री श्रीशगुणदर्पणस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री श्रीशगुणदर्पणस्तोत्रम् ॥

या सुगन्धास्यनासादिनवद्वाराऽखिलेन या।
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी॥ १ ॥

या नित्यपुष्टा सर्वाङ्गैः सौन्दर्यादिगुणैरपि।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ २ ॥

मातर्लक्ष्मि नमस्तुभयं माधवप्रियभामिनि।
युवां विश्वस्य पितरावितरेतरयोगिनौ॥ ३ ॥

समना किल मातस्त्वममुना तदयोगिनी।
मम नाथेन नैव स्या विमनाश्च न स त्वयि॥ ४ ॥

त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः।
त्वं मूलप्रकृतिर्देवी स दिव्यपुरुषः किल॥ ५ ॥

यस्त्वामुरसि धत्तेऽम्ब कौस्तुभद्युतिभासिते।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत्॥ ६ ॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः।
युवां युवानौ सततं युवयोर्न वयोऽधिकः॥ ७ ॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा।
पद्मद्वयकरा पद्मकोशाभस्तनशोभना॥ ८ ॥

पद्महस्ता पद्मपादा पद्मनाभमनःप्रिया।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी॥ ९ ॥

अम्बां पीताम्बरश्रोणीं लम्बालकलसन्मुखीम्।
बिम्बाधरोष्ठीं कस्तूरीजम्बालतिलकां भजे॥ १० ॥

www.prapatti.com

रत्नोद्दीप्तसुमाङ्गल्यसूत्रावृतशिरोधराम्।
कुण्डलप्रभयोद्दण्डगण्डमण्डलमण्डिताम्॥ ११ ॥

कुचकञ्चुकसञ्चारिहारानीकमनोहराम्।
काञ्चीकिङ्किणिमञ्जीरकङ्कणाद्यैरलङ्कृताम्॥ १२ ॥

सुवर्णमण्डपे रत्नचित्रसिंहासनोत्तमे।
नमामि हरिणा साकमिन्दिरां कृतमन्दिराम्॥ १३ ॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुराङ्गनाः।
यां पूजयन्ति सेवन्ते सा मां पातु रमा सदा॥ १४ ॥

सर्वालङ्कारभरितौ सर्वसद्गुणमण्डितौ।
शर्वादिसर्वभक्तौघसर्वसम्पद्विधायकौ॥ १५ ॥

सुमुखौ सुन्दरतरौ सुनासौ सुखचित्तनू।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः॥ १६ ॥

चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता।
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेः प्रिया॥ १७ ॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम्।
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम्॥ १८ ॥

वादिराजेन रचितं श्रीश्रीशगुणदर्पणम्।
इमं स्तवं पठन् मर्त्यः श्रीमान् स्यान्नात्र संशयः॥ १९ ॥

॥ इति श्री श्रीशगुणदर्पणस्तोत्रं सम्पूर्णम्॥

www.prapatti.com